॥ अथ प्रासादमण्डन ग्रन्थः ॥

श्रीगणेशाय नमः॥ गणेशाय नमस्तस्मै निर्विघ्नसिद्धिहेतवे। आदिगौरीसमुद्भूततेजसे शांभवाय च॥१॥ महामायेतियागीता चिन्मयी हृन्निसत्तमैः। करोतु वाग्विलासं मे जिह्वायां सा सरस्वती॥२॥ श्रीसृष्टेः सूत्रधारस्य प्रसादाद्विश्वकर्मणः। प्रासादमंडनं ब्रूते सूत्रधारेषु मंडनः॥३॥ गृहेषु यो विधिः प्रोक्तो विनिवेश प्रवेशने। स एव विदुषा कार्यो देवतायतनेष्वपि॥४॥ हिमाद्रेरुत्तरे पार्श्वे चारुदारुवनं परं। पावनं शङ्करस्थानं तत्र सर्वैः शिवोऽर्चितः॥५॥ प्रासादाकारपूजाभिर्देवते त्यादिभिः क्रमात्। चतुर्दश समुत्पन्नाः प्रासादानां च जातयः॥६॥ नागरा द्राविडाश्चैव भूमिजा लतिनस्तथा। सावधारा विमानाद्या नागराः पुष्पकान्तिकाः॥७॥ मिश्रकैस्तिलकैः शृङ्गैरष्टौजातिषु चोत्तमाः। सर्वदेवेषु कर्त्तव्याः शिवस्यापि विशेषतः॥८॥ प्रासादानां च सर्वेषां जायते देशभेदतः। चतु

र्दश प्रवर्त्तन्ते ज्ञेया लोकानुसारतः॥९॥ लक्ष्यलक्षणतोऽभ्यस्यात् गुरुमार्गानुसारतः। प्रासादभवनादीनां सर्वं ज्ञानमवाप्यते॥१०॥ शुभलग्ने सुनक्षत्रे पंचग्रहबलान्विते। मासर्क्षसंक्रांतिविद्धादि निषिद्धसमयोज्झिते॥११॥ सर्वदिक्षु ध्रुवाद्वा प्राग्दक्संकर ध्रुवं। भुवं परीह्य सिंचेत पंचगव्येनकोविदः॥१२॥ मणिना स्वर्णरौप्यादि विद्रुमेण फलेनवा। चतुःषष्टिपदैर्वास्तु लिखेद्वापि शतांशकैः॥१३॥ पिष्टेनवा क्षतैः शुद्धैस्ततोवास्तुं समर्चयेत्। पूर्वोक्तेनविधानेन बलिपुष्पादिपूजनैः॥१४॥ इंद्रोवह्निः पितृपतिर्नैर्ऋतो वरुणोमरुत्। कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्॥१५॥ दिक्पालाः क्षेत्रपालाश्च गणेशश्चण्डिका तथा। तेषांच विधिवत् पूजां कृत्वाकर्म समारभेत्॥१६॥ पूजनं विधिवत् कृत्वा सूत्रधारंतु पूजयेत्। वस्त्रालङ्कारसंयुक्तं तोषयेच्च धनादिभिः॥१७॥ धनुर्मीनस्थिते सूर्ये गुरौ शुक्रेऽस्तगे विधौ। वैधृतेव्यति

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

प्रातेभे दग्धे नेष्टं कदाचन ॥१८॥ वान्यादि त्रित्रिगे सूर्ये द्वारं पूर्वादि युत्पलेत्। सृष्ट्या वत्सं मुखं तत्र स्था
पिनो रानि कृद्धतः॥१९॥ आयो व्ययर्क्षभंशस्य भित्तिवा ह्ये सुरालयः॥ ध्वजायो देव नक्षत्रं व्ययांशौ प्रथ
मौ शुभौ॥२०॥ केप्राच मरुतां गेहे वृष सिंह गजाः शुभाः। हीन आय व्यय श्रेष्ठाः पिशाचस्तु समोऽधिकः॥
२१॥ देवतानां गृहे चिंत्य सीमा चंग चतुष्टयं। नवांगं नाडिवेधादि स्थापकांभर्यो मिथः॥२२॥ आयादि
चिन्तनं भूमि लक्षणं वास्तुमण्डलं। मास नक्षत्र लग्नादि चिन्तनं पूर्व शास्त्रतः॥२३॥ रात्रौ दिक् साधनं
कुर्य्यात् दीप सूत्र ध्रुवैक्यतः। समे भूमि प्रदेशे तु शंकु दिवसे थवा॥२४॥ नागवास्तुं समालोक्य ततः खात
विधिं सुधीः। प्राप्ताणान्तं जलान्तं वा ततः कूर्म्मं निवेशयेत्॥२५॥ अर्धांगुलो भवेत् कूर्म एक हस्ते सुरालये।
अर्धांगुला ततो वृद्धि कार्या तिथिकरावधिः॥२६॥ एकत्रिंशत्करांतं च तदूर्ध्वं वृद्धि रिष्यते। ततोर्ध्वमपि

शतार्धोनं कूर्म मन्वंगुलोऽन्तिमः॥२७॥ चतुर्थांशाधिकोज्येष्ठः कनिष्ठो हीनयोगतः। सौवर्णो रौप्यजोवापि
स्थाप्यः पंचामृतेन सः॥२८॥ ईशानादग्नि कोणांता शिला स्थाप्या प्रदक्षिणा। मध्ये कूर्म शिला पश्चाद्
गीत वादित्र मंगलैः॥२९॥ वलिदानंच नैवेद्यं विविधान्नं घृत प्लुतं। देवताभ्यः सुधी र्दद्यात् कूर्म न्यासे शि
लासुच॥३०॥ सूत्रारम्भो गृहादीना मुत्तरायां करत्रये। ब्राह्मे पुष्ये मृगे मैत्रे पौष्णे वासव वारुणे॥३१॥ शि
लान्यासस्तु रौहिण्यां श्रवणे हस्त पुष्ययोः। मृगशीर्षे चरे चित्रा मुत्तरात्रितये शुभः॥३२॥ नद्यां सिद्धाश्रमे ती-
र्थे पुरे ग्रामेच गह्वरे। वाटी वापी तडागादि स्थाने कार्यं सुरालये॥३३॥ स्वशक्त्या काष्ठ मृत्स्येष्टि शिलाधातुज
दलजा। देवतायतनं कुर्याद्धर्मार्थ काम मोक्षदं॥३४॥ देवानां स्थापनं पूजा पापहृद्दर्शनादिकं। धर्मबृद्धौ
भवेद्दर्शं काममोक्षास्ततोनृणां॥३५॥ कोटि ग्रंथनजे पुण्यं मृण्मये दशसंगुणं। ऐष्टके शतकोटिघ्नं शैलज

नन्तपालं गृहे ॥३६॥ कूर्मसंस्थापने द्वारे पद्माख्यायांचपौरुषे। घटे ध्वजे प्रतिष्ठायां एवं पुरुषाद्दसप्तकं॥३७॥
भूम्यारम्भे तथा कूर्मे शिलायां सूत्रपातने। पुरे द्वारोच्छ्रये स्तम्भे पंढ्रे पद्म शिलासुच ॥३८। शुकनासे चपु
रुषे घंटायांकलशे तथा। ध्वजोच्छ्रायेच कुर्वीत शान्तिकानि चतुर्दश ॥३९॥ एकहस्तादि प्रासादो याव
द्धस्तशतार्धकं। प्रमाणं कुम्भके मूलं नासिके भित्तिवाह्यतः॥४०॥ कुम्भादिस्थावरणांच निर्गमः समसू
त्रतः। पीठस्य निर्गमो वाह्ये तथैवच्छादकस्यच ॥४१॥ त्रिपंचसप्तनवभिः फालनाभिर्विभाजयेत्। प्रा
सादे अंग संख्याता वारिमार्गास्तराः स्थिताः॥ ४२॥ फालना कर्णतुल्यातु भद्रंतु द्विगुणं मतं। सामान्योऽ
यं विधिस्तुल्यो हस्ताङ्गुलविनिर्गमः॥४३॥ ॥इति श्रीसूत्रधार मंडन विरचित प्रासाद मंडने वास्तुशास्त्रे
मिश्रकलक्षणो प्रथमोऽध्यायः॥०॥ प्रासादानामधिष्ठानं जगती सा निगद्यते। यथासिंहासनं राज्ञः प्रा

सादस्य तथैवसा॥१॥ चतुरस्रायताष्टास्रा वृत्ता वृत्तायताताथा। जगती पंचधा प्रोक्ता प्रासादस्यानुरूपतः।
२॥ प्रासाद प्रथिमाना च त्रिगुणा च चतुर्गुणा। क्रमात पंचगुणा प्रोक्ता ज्येष्ठा मध्या कनीयसी॥३॥ कन्यसेक
न्यसाज्येष्ठे ज्येष्ठा मध्येच मध्यमा। प्रासादे जगतीकार्या स्वरूपा लक्षणान्विता॥४॥ रसस सप्तगुणा ख्याता
जिने पर्यायसंस्थिता। द्वारिकायां च कर्त्तव्या तथैव पुरुषत्रये ॥ ५॥ मंडपानुक्रमेणैव स्वपादांशेन साधितः।
द्विगुणा वायता कार्या सहस्रायतना वधि ॥६॥ त्रि द्वैक भ्रमसंयुक्ताज्येष्ठा मध्या कनिष्ठिका। उच्छ्रय
स्य त्रिभागेण भ्रमणीनां समुच्छ्रयः॥७॥ चतुःकोणैस्तथा सूर्यकोणै र्विंशति कोणकैः। अष्टाविंशति
षट्त्रिंशत् कोणैः स्युः पंच फालना॥८॥ प्रासादे द्वार्कहस्तांते त्रिंशे द्वाविंशतिः करैः। द्वात्रिंशति
चतुर्थांशो भूतांशोवा शतार्धकैः॥९॥ एकहस्ते करैणो वा सार्धव्यंशा चतुःकरे। सूर्यजैन शतार्धानां क्रमात्

द्वि त्रि युगांशकैः॥२०॥ तदुच्छ्रायं भजेत् प्राज्ञस्त्वष्टा विंशतिभिः पदैः। त्रिपदो जाड्यकुम्भश्च द्विपदं करणकं
तथा॥२१॥ पद्मपत्रसमायुक्ता त्रिपदा सरपत्तिका। द्विपदं घुरुकं कुर्यात् सप्तभागं च कुम्भकं॥२२॥ कलश
स्त्रिपदः प्रोक्तो भागेनान्तरपत्रकं। कपोतालीत्रिभागाच पुष्पकण्ठो युगांशकः॥२३॥ पुष्पकाजा
ड्यकुम्भश्च निर्गमश्चाष्टभिः पदैः। कक्षेषु च दिशामालाः प्राच्यादिषु प्रदक्षिणाः॥२४॥ प्राकारैर्भ
ण्डिता कार्या चतुर्भिर्द्वारभण्डपैः। मकरैर्जलनिष्कासैः सोपानैस्तारणादिभिः॥२५॥ मण्डपाग्रे प्रतो
लयग्रे सोपानश्रुण्डिकाग्रतः। तोरणं कारयेत्तस्य पद्मं पादानुसारतः॥२६॥ तोरणस्योभयस्तम्भ
विस्तारं गर्भमानतः। भित्तिगर्भप्रमाणेन तयोर्मध्येऽथवाभवेत्॥२७॥ वेदिकापीठरूपैश्च शोभाभिर्बहु
भिर्युतं। विचित्रं तोरणं कुर्याद्देवालदेवस्य तत्रच॥२८॥ प्रासादाद्धीनस्थाने करणीया चतुःष्किका॥एक

द्वित्रिचतुःपंचरससप्तपदान्तरे॥२९॥ आयामेन नवांशेतु पंचषट्सप्तभागिका॥ युग्यनाभिस्तनान्तंवा
त्रिविधा वारुनादयः॥३०॥ पादजानु कटिं याव दर्चाया वोरुनस्य दृक्। वृषस्य विष्णुभागान्ते सूर्ये व्योम
स्तनान्तकं॥३१॥ जिनाग्रे संवसरणं शुकाग्रे गूढमण्डपं। गूढस्याग्रे चतुष्काद्यं तदग्रे नृत्यमण्डपं॥
३२॥ द्विसप्तत्या द्विवाशैर्वा चतुर्विंशतितोऽपिवा। जिनालयैश्चतुर्दिक्षु सहितं जिनमन्दिरं॥३३॥ मण्डु
पाद्गर्भसूत्रेण वामदक्षिणयोर्दिशोः। अष्टापदं प्रकर्त्तव्यं त्रिशालाचावलाणकं॥३४॥ अपरे रथशा
लाच मठयाम्ये प्रतिष्ठिता। उत्तरे रथरन्ध्रंच प्रोक्तं श्रीविश्वकर्मणा॥३५॥ इति प्रासादजगती॥
अग्रतः पृष्ठतश्चैव वामदक्षिणयोर्दिशोः। प्रासादं कारयेदन्यं नाभिवेधविवर्जितं॥३६॥ सिद्धाग्रेच
नकर्त्तव्या अर्चारूपेण देवता। प्रभा नष्टा न भोगाय तथा तारा दिवाकरे॥३७॥ शिवस्याग्रे शिवं कुर्यात्

ब्रह्माणं ब्रह्मणो ऽग्रतः। विष्णो रग्रे भवे द्विष्णु जिनेजैनो रवौ रविः॥२८॥ ब्रह्म विष्णोरेक नाभि द्वाभ्यां दो
ला न विद्यते। शिवस्याग्रे ऽन्यदेवस्य दृष्टिवेधे महद्भयं॥२९॥ प्रसिद्ध राजमार्गस्य प्राकारस्यान्तरे ऽपिवा।
स्थापये दन्यदेवस्य तत्र दोषो न विद्यते॥३०॥ शिवस्यानो दकं गूढ मार्गं चरणु मुखे क्षिपेत्। दृष्टं नील
ङ्क येत्तत्र हन्ति पुरुषं पुराकृतं॥३१॥ एका चंड्या रवेः सप्त तिस्रो दद्याद्विनायके। चतस्रो वासुदेवस्य शि
वस्यार्धं प्रदक्षिणं॥३२॥ अग्रतो जिनदेवस्य स्तोत्र मंत्रार्चनादिकं। कुर्यान्न दर्शयेत् पृष्ठं सम्मुखे द्वारलं
घनं॥३३॥ पूर्वापर मुखे द्वारे प्रणालं शुभ मुत्तरे। इति शास्त्र विचारो ऽय मुत्तरास्यान देवता॥३४॥
मण्डपे ये स्थिता देवास्तेषां वामेच दक्षिणे। प्रणालं कारयेद्धीमान् जगत्यां चतुरो दिशः॥३५॥ पूर्वापरा
स्यं देवानां कुर्यान्नो दक्षिणोत्तरं। ब्रह्म विष्णु शिवार्केन्द्रा गुहः पूर्वापराङ्मुखाः॥३६॥ नगरा भिमुखाः श्रेष्ठाः

मध्ये वाह्ये च देवता गणेशो धनदो लक्ष्मी पुरद्वारे सुखावहाः॥३७॥ विघ्नेशो भैरवश्चण्डी नकुलीशो ग्रह
स्तथा। मातरो धनदश्चैव शुभा दक्षिण दिङ्मुखाः॥३८॥ नैर्ऋता भिमुखः कार्यो हनूमान् वानरेश्वरः।
अन्ये विदिङ्मुखा देवा नकर्त्तव्याः कदाचन॥३९॥ इति देवानां दृष्टि दोषा दिग्भागाः॥ सूर्यारुणेशो
विष्णुश्च चण्डी शम्भुः प्रदक्षिणे। भानोर्गृहे ग्रहास्तस्य गणा द्वादश मूर्तयः॥४०॥ इति सूर्यायतनं॥ ॥
गणेशस्य गृहे तद्वच्चण्डी शम्भु र्हरी र्विधिः। मूर्तयो द्वादशान्येऽपि गणाः स्थाप्या हिताश्चये॥४१॥
इति गणेशः॥ विष्णोः प्रदक्षिणेनैव गणेशार्काम्बिका शिवाः। गोप्य स्तस्यावताराश्च मूर्तयो द्वारका
तथा॥४२॥ इति विष्णोरायतनं॥ चंड्याः शम्भुर्गणेशोऽर्को विष्णुः स्थाप्याः प्रदक्षिणाः। मातरो मूर्तयो
देव्या योगिन्यो भैरवाष्टकः॥४३॥ इति चंडिकायतनं॥ शम्भुः सूर्यो गणेशश्च चण्डी विष्णुः प्रदक्षिणे। स्थाप्याः

सर्वे शिवस्थाने दृष्टिवेध विवर्जिताः॥४४॥इति शिवायतनं॥ रुद्रस्त्रिपुरुषो मध्ये रुद्रधामगतो हरिः। द्
क्षिणाङ्के भवेद्ब्रह्मा विपर्यासे भयावहः॥४५॥ रुद्रवक्त्रविभागोनो हरिरर्धं पितामहः। तत्तुल्या पार्वती
देवी सुखदा सर्वकामदा॥४६॥ इति त्रिपुरुषन्यासः॥ ॥इति प्रासादमण्डने सूत्रधारमण्डनविरचिते
वास्तुशास्त्रे जगती दृष्टिदोष आयतनाधिकारो द्वितीयोऽध्यायः॥ ॥अतिस्थूला सुविस्तीर्णा प्रासादा
धारिणी शिला। अतीव सुदृढा कार्या इष्टिका चूर्णवारिभिः॥२॥ शिलोपरि भवेद्भिट्टं एकहस्त युगाङ्गुलं।
अर्द्धाङ्गुला भवेद्वृद्धि र्यावद्धस्त शतार्धकं॥२॥ अंगुल्यांश विहीनेन अर्धेनार्धेनच क्रमात्। पंच दिक् विंश
तिर्यावत् शतार्धं च विवर्धयेत्॥३॥ एकद्वित्रिभिदानि हीनहीनानि कारयेत्। स्वस्वोदय प्रमाणश्च चतु
र्थांशेन निर्गमः॥४॥ इतिभिट्टं पीठमर्धं त्रिपादांशे एकद्वित्रिकरे गृहे। चतुर्हस्ते त्रिसार्धांशं पादांशं पंच

हस्तके॥५॥ दशविंशतिषट्त्रिंशत् शतार्धं हस्तकावधि। वृद्धिर्वेद त्रियुग्मेन्दु संख्या स्यादंगुलैः क्रमात्॥६॥
पंचांशं हीन माधिक्य मे कैकन्तु त्रिधापुनः। त्रिपंचाश समुत्सेधं द्वाविंशत्यंश निर्गमः॥७॥न
वांशोजाड्यकुम्भश्च सप्तांशं कणकंभवेत्। सान्तरांशा कपोताली सप्तांशा ग्रासपट्टिका॥८॥सूर्य
दिग्वसुभागाश्च गजवाजिनराः क्रमात्। वाजिस्थाने तथाकार्यं स्वं स्वं देवस्य वाहनं॥९॥ पंचां
शाः कणकाग्रेतु निर्गमो जाड्यकुम्भकः। त्रिसार्धंकणकं सार्धचतुर्भि ग्रासपट्टिका॥१०॥ कुंजराश्च
नरा वेदाराम युग्मांश निर्गमः। अन्तराल मधस्तेषां मूर्ध्वाधः कण युग्मकं॥११॥ गजपीठनिभा
स्वल्पे द्रव्ये पुरुषं महत्तरं। जाड्यकुम्भ कणालींच ग्रासपट्टी तदाभवेत्॥१२॥ कामदं कण पीठंच
जाड्यकुम्भ कणालिका॥ लतिभे निर्गमे हीनं साधारे निर्गमाधिकं॥१३॥ सर्वेषां पीठमाधारं

पीठहीनं निराश्रयं। पीठहीनंविनश्यंति प्रासादभवनादिकं॥२४॥ इति पीठः॥ हस्तादिपंचपर्यंतं विस्तारेणोदयः समः। संक्रमानंचसप्तेषु रामचंद्रांगुलाधिकः॥२५॥ पंचादिदशपर्यंतं त्रिंशद्यावच्छतार्धकं। हस्तैकरक्रमाद्वृद्धि र्मनुसूर्यांगुलाः॥२६॥ एकहस्तादिपंचानां पृथुत्वेनोदयः समः। हस्ते सूर्यांगुलाकुला वृद्धि र्यावत्त्रिंशत्करावधि॥२७॥ नवांगुलाकरेवृद्धि र्यावद्धस्तशतार्धकं। पीठोर्ध्वउदयश्चैवच्छाद्यन्तोनागरादिषु॥२८॥ एकविंशतिभिर्भक्ते प्रासादस्य समुच्छ्रये। पंचादिनवभागान्तं पीठस्य पंचधोदयः॥२९॥ वेदवेदेंदुभक्तेषु छाद्यान्तो पीठमस्तकात्। पूरकःपंचभागःस्याद्विंशतिः कुंभकस्तथा॥२०॥ कलशोऽष्टौ द्विसार्धंतु कर्त्तव्यमन्तरालकं। कपोतिकाष्टौ मंचीच कर्त्तव्या नवभागिका॥२१॥ पंचत्रिंशत्पदा जंघा तिर्य्यंशै कुंभो भवेत्। वसुभिर्भरणीकार्या दिग्भागंच

शरावटी॥२२॥ अष्टांशोर्ध्वं कपोताली द्विसार्धमन्तरालकं। छाद्यं त्रयोदशांशोच्चं दशभागैर्विनिर्गतं॥२३॥ इतिभरणयः॥ मेरुमंडोदरेमंची भरण्यूर्ध्वेऽष्टभागिका। पंचविंशतिका जंघा उद्गमश्च त्रयोदश॥२४॥ अष्टांशाभरणीशीर्षं पूर्ववत्कल्पयेत्सुधीः। सप्तभागाभवेन्मंची कुंभछाद्यस्य मस्तके॥२५॥ षोडशांशा पुनर्जंघा भरणीसप्तभागिका। शिरावलीचतुर्भागात्पदस्यापंचभागिका॥२६॥ सूर्यांशेषुचछाद्यंच सर्वकामफलप्रदं। कुंभकस्य युगांशेन स्थावरांगं प्रवेशकः॥२७॥ इतिमेरुमंडपे॥ शिरावल्युद्गमो मंची जंघारूपाणि वर्जयेत्। अल्पद्रव्यं महत्पुण्यं कथितं विश्वकर्म्मणा॥२८॥ इति सामान्यमंडपः॥ पीठतः छाद्यपर्यन्तं सप्तविंशतिभाजिते। द्वादशानांक्षुरादीनां भागसंख्याक्रमेणका॥२९॥ स्याद्वेदकवेदसार्धार्धं सार्धसार्धाष्टभिस्त्रिभिः। सार्धसार्धार्धभागैश्च द्विसार्धांशं

निर्गमः ॥३०॥ इति प्राकारान्तरे भरणयः॥ पादांशे नैष्किकं पंच षडंशैः शैलदारुजे। साधारे षष्ठांशका भित्तिर्द्वांशा धातुरत्नजे ॥३१॥ मध्ये युगास्रं भद्राढ्यं शुभदं प्रतिभद्रकं। फालनीयं गर्भगृहं देवदं गर्भभायतं॥३२॥ कुम्भकेन समा कुम्भी स्तम्भप्रान्तेन तूद्गमः। भरण्याभरणं शीर्षं कपोताख्या समं भवेत्॥३३॥ पेटके कुंटछाद्यस्य कुर्यात् पट्टस्य पेटकं। सषडंशः सपादश्च सार्धो गर्भस्य विस्तरात्॥३४॥ वृहद्देवालये पट्ट पेटान्तं हि त्रिधोदयं। भजेद्दृष्टाभिरंशाभिः कुम्भीस्तम्भोर्ध्वपंचभिः॥३५॥ अर्धेन भरणं शीर्षं मेकपट्टस्तु सार्धकः। व्यासार्धेन करोदंस्या द्वुदयो विषमाः शुभाः॥३६॥ इति गर्भगृहप्रमाणं ॥ मूलकर्णस्य सूत्रेण कुम्भेनोदुम्बरः समः। तदधः पंचरत्नानि स्थापयेत शिल्पि पूजया॥३७॥ द्वारव्यास त्रिभागेन मध्ये मन्दारको भवेत्। वृत्तं मन्दारकं कुर्यान्मृणाल

पद्मसंयुतं॥३८॥ जाड्यकुम्भकरणालीच कीर्तिवक्त्रा द्वयंतथा। उदुम्बरस्य पार्श्वेच शाखायास्तमरू पकं॥३९॥ कुम्भस्यार्धे त्रिभागे वा पादे हीनोप्युदुम्बरः। तद्वदंकरणकं मध्ये पीठान्तो नाद्यभूमिका॥ ४०॥ इति उदुम्बरः॥ पूरकेण समं कुर्यादर्धचन्द्रस्य चोत्सृतिं। द्वारव्याससमं दैर्घ्यं निर्गमंच तदर्धतः॥ ४२॥ द्विभागमर्धचन्द्रंच भागेन द्वौ गलारकौ। शंखपत्रसमायुक्तं पद्माकारैरलंकृतं॥४२॥ इत्यर्धचंद्रः॥ एकहस्तेतु प्रासादि द्वारं स्यात षोडशांगुलं। षोडशांगुलिका वृद्धि र्यावद्धस्तचतुष्टयं॥४३॥ अष्टहस्तान्तकायंच दैर्घ्ये वृद्धिश्चरांगुला। द्व्यंगुला प्रतिहस्तंच यावद्धस्तशतार्धकं॥४४॥ यानवाहनपर्यङ्क द्वारं प्रासादसद्मनां। दैर्घ्यार्धेन पृथुत्वं स्यात शोभनं तत्कलाधिकं॥४५॥ इति नागर प्रासाद द्वारं॥ एकहस्तेतु प्रासादे द्वारं सूर्यांगुलोदयं। सूर्यांगुला प्रतिकरं वृद्धिः पंचकरावधि॥४६॥ पंचांगुलाच

सपृष्ठान्तं नवान्तंस्याद् युगांगुलं। द्व्यंगुला ~~प्रमाणस्तंभ मानद्वयसप्तार्धकं~~ ॥४७॥ इति भूमिजे द्वारं॥ प्रासादे एक
हस्तेतु द्वारं कुर्याद्दशांगुलं। रसहस्तान्तकं यावत्तावती वृद्धिरिष्यते ॥४८॥ पंचांगुला दशान्तंच द्व्यंगुलाच
शतार्धकं। विमाने भौमजे मानं वराटेषु तथैव च। मिश्रके लतिने चैव प्रशस्तं नागरे ध्रुवं ॥४९॥ विमा
नानांगरं छन्दे कुर्याद्विमानपुष्पके। सिंहावलोकने द्वारं नागरं शोभनं मतं ॥५०॥ बलभ्यां भौमजं
मानं कांसाकारेषु द्राविडं। धातुजे रत्नजेचैव प्रशस्तं नागरे ध्रुवं॥५१॥ इति द्वारप्रमाणं॥ नवशाखा महे
शस्य देवानां सप्तशाखिकं। पंचशाखं सार्वभौमे त्रिशाखं मण्डलेश्वरे॥५२॥ एकशाखं भवेद्द्वारं शूद्रे वैश्ये
द्विजे सदा। सप्तशाखं च भूपानां श्रेष्ठानरा संभवायसे ॥५३॥ त्रिपंच सप्तनन्दाग्रे शाखाः स्युरंगतुल्यकाः। हीन
शाखं न कर्त्तव्यं मधिकाढ्यं सुखावहं ॥५४॥ अंगुलं सार्धमर्धं वा कुर्याद्धीनं तथाधिकं। आपद्दोष विशुद्ध्यर्थं

ह्रासवृद्धिर्न दुष्यति ॥५५॥ चतुर्भागावितं कुर्यात शाखा विस्तारमानकं। मध्ये द्विभागिकं कुर्यात स्तम्भ पुरुष
संज्ञकं॥५६॥ स्त्रीसंज्ञकं भवेच्छाखा पार्श्वतो भोगभागिका। निर्गमेचैकभागेन रूपस्तम्भः प्रशस्यते॥५७॥
एकांश सार्धभागं च पादोनं द्व्यंशमेवच। द्विभागं निर्गमे कुर्यात स्तम्भं द्रव्यानुसारतः॥५८॥ पट्टके विस्तरं
कार्यं प्रवेशस्य युगांशकं। कोणिका स्तम्भमध्येतु भूषणार्थं हि पार्श्वतः॥५९॥ द्वार दैर्घ्यं चतुर्थांशो द्वार
पालो विधीयते। स्तम्भशाखादिकं शेषं त्रिशाखेच द्विभाजयेत्॥६०॥ इति त्रिशाखं॥ पत्रशाखा च गंधर्वी
रूपस्तम्भस्तृतीयकः। चतुर्थी खलु शाखाच गन्धर्वी तथ पंचमी॥६१॥ इति पंचशाखं॥ प्रथमा पत्रशाखा
च गन्धर्वी रूपशाखिका। चतुर्थी स्तम्भशाखाच सिंहशाखाच सप्तमी॥६२॥ स्तम्भशाखा भवेन्मध्ये
रूपशाखाग्रसूत्रतः॥६३॥ इतिसप्तशाखं॥ पत्रा गन्धर्वसंज्ञाच रूपस्तम्भस्तृतीयकः। चतुर्थी खलु शाखाच

गन्धर्वा। अथ पंचमी॥६४॥ रूपवस्तभस्तथा लक्ष्मी रूपशारवा ततः परा। नव खल्वशारवाच सिंहारव्या मूलकर्णी न संमिता॥६५॥ यस्यदेवस्य या देवस्य या मूर्त्तिः सेवकार्योत्तरंगके॥ ~~यस्यदेवस्य या मूर्त्ति~~ शरवायांच परी वार्से गणेशास्योत्तरंगके॥६६॥ इति नवशारवा॥ ॥ इतिश्री सूत्रधार मण्डन विरचिते प्रासाद मण्डने वास्तुशास्त्रे भिट्टपीठ मण्डप गर्भगृह उदुम्बर प्रमाणं तृतीयोऽध्यायः॥ ॥ द्वारेच्छ यश्च नवधा भाग मेकं परित्यजेत्। शेषे अंशे द्विभागाच त्र्यंशेन द्वारतोऽथवा॥१॥ द्वारदैर्घ्येतु तत्तांशे तिथि शक्रकलांशकैः। ऊर्ध्वार्चा आसनस्थातु मनुविश्वार्क भागतः॥२॥ चतुरस्रीकृतक्षेत्रे दशभाग विभाजिते। भित्तिः कार्या द्विभागेन षड्भागं गर्भमन्दिरं॥३॥ तृतीयांशेन गर्भस्य प्रासादे प्रतिभोत्तमा। मध्यमासप्तदशांशेन पंचांशेनाकनीयसी॥४॥ आयभागैर्भजेद् द्वारं भद्रमस्य मूर्ध्वतस्त्यजेत्। सप्तमे सप्तमे दृष्टि र्वृषे सिंहे ध्वजे शुभा॥५॥

षष्ठभागस्य पंचांशे लक्ष्मीनारायणादिकं। शयनार्चे सलिंगानि द्वारार्धेन व्यतिक्रमात्॥६॥पदाधोयत्त भूताद्याः पादाग्रे सर्वदेवताः। तदर्धं वैष्णवं वाह्यं मध्ये लिंगं शिवस्यच॥७॥ इति प्रतिमा प्रमाणं॥ दृष्टिपदस्थानं छाद्यस्योर्ध्वं प्रहारः स्यात शृंगं शृंगे तथैवच। प्रासादाः शृंगशृंगेषु अर्धभागे तु छाद्यकं॥८॥ मूलकर्णी रथादौवा एकेद्वित्रिक्रमं न्यसेत्। निराधारे मूलभित्त्योः साधारे भ्रमि भित्तिषु॥९॥ उरुशृंगाणि भद्रेस्युरेकादि गृहसंख्यया। त्रयोदशोर्ध्वं सप्ताधोलुप्तानिचोरुशृंगकैः॥ १०॥ रेखामूलंच दिग्भागं कुर्यादूर्ध्वं षडंशकं। षडवाह्ये दोषदं प्रोक्तं पंचमध्येन शोधनं॥११॥स पादं शिखरं कार्यं सकर्णं शिखरोदयं। सपादकर्णयोर्मध्ये रेखाः स्युः पंचविंशतिः॥१२॥सपादं कर्णयोर्मध्ये उदयं पंचविंशतिः। प्रोक्तारेखा कलाभेदैर्वलशैः पंचविंशतिः॥१३॥ पंचादीनान्तु युग्मा

न्तं खंडानि तेष्वनुक्रमात्। अंशवृद्ध्या कलाः कार्या दैर्घ्ये स्कन्धेच तत्समाः॥१४॥ अष्टादवष्टषष्ठा
न्तं चतुर्वृद्ध्या च षोडश॥ दैर्घ्यतुल्याः कलाः स्कन्धे एकहीनाः सुशोभनाः॥१५॥ ऊर्ध्वा अष्टादशां
शाः स्युस्तिर्यक् षोडशमेवच। चक्रेऽस्मिन् संभवंत्येव रेखाणां षट्शरद्वयं॥१६॥ त्रिखण्डात् खण्डवृद्धि
श्च यावदष्टौ दशैवहि। एकैकांशौ कलांशौच समाचार्यांश्च षोडश॥१७॥ द्वितीया प्रथमेखंडे
कलाष्टौ द्वितयेनवा। तृतीये दशखंडेषु शेषेषूर्ध्वयं क्रमः॥१८॥ अष्टदिक् सूर्यभागैश्च त्रिखण्डा
तृतीया भवेत्। अनेन क्रमयोगेन कोष्ठावंकैः प्रपूरयेत॥१९॥ रेखाणां जायते संख्या षट् पंचाशत शत
द्वयं। दैर्घ्ये भवन्ति यावन्तः कलास्कन्धेपि तत्समाः॥२०॥ इति रेखा निर्णयः॥ विंशत्या विभजेद्भागैः
शिलातः कलशान्तकं॥ मंडोरवाष्ट सार्धाष्ट नवांशैः शिखरं पुनः॥२१॥ रेखा मूलस्य विस्तारात् पद्म
रेख

कोशं समाचरेत्। चतुर्गुणेन सूत्रेण सपादं शिखरोदयं॥२२॥ स्कन्धकोशान्तरे सप्तभक्ते ग्रीवातुभागतः।
सार्धमामलसारंच पद्मं छत्रंच सार्धकं॥२३॥ त्रिभागे उच्चकलशो द्विभागस्तस्य विस्तरं। प्रासादस्या
ष्टमांशेन पृथुत्वंकलशाणुके॥२४॥ छाद्यतः स्कन्धपर्यन्तं मेकविंशति भाजिते। अंकऋक् रुद्र
सूर्यांशै विश्वांशैस्तस्य चोच्छ्रितिः॥२५॥ शुकनासस्य संस्थाने छाद्योर्ध्वं पंचधा मतं। एकत्रिपंच सप्तां
क सिंहस्थानानिकल्पयेत्॥२६॥ द्वारस्य दक्षिणे वामे कपाली प्रविधा मता। तदूर्ध्वे शुकनासः स्यात तैव
प्रासादनादिका॥२७॥ प्रासादो दशभागश्च द्वित्रिवेदांश संमिता। प्रासादार्धेन पादेन त्रिभागेनोर्धनि
र्मिता॥२८॥ शृंगोरु शृंग प्रत्यंगे खण्डुकान् गणयेत सुधीः। स्तवकं तिलकं कर्णी कुर्यात प्रासादभूष
णं॥२९॥ दशांशे शिखरे मूले अग्रे तत्र नवांशके। सार्धांशकौ स्थौ कोणौ द्वौ शेषं भद्रमिष्यते॥३०॥

रथयो रुभयो रन्त वृत्त मामल सारकं। उत्सेधो विस्तरार्धेन चतुर्भागै र्विभाजिते॥३१॥ ग्रीवा चामलसा
रस्य पादोनाच सपादकः॥ चन्द्रिकाभागमानेन भागैरामल सारिका॥३२॥ घृत पात्रं न्यसेन्मध्ये ताम्र
तार सुवर्णजं। सौवर्णं पुरुषं तत्र तूली पर्यंक शायिनं॥३३॥ प्रमाण पुरुषस्यार्धां उलंकुर्यात् करं प्रति।
त्रियताकं करं वामे हृदिस्थं दक्षिणेऽम्बुजं॥३४॥ प्रासाद पृष्ठि देशेतु दक्षिणेतु प्रतीरथो ध्वजाधा
रस्तु कर्त्तव्य ईशाने नैर्ऋतेऽथवा॥३५॥ इति प्रासादस्योर्ध्वलक्षणं॥ क्षीरार्णवे समुत्पन्नं प्रासादस्या
ग्रजातकं। मांगल्येषु च सर्वेषु कलसं स्थापये द्बुधः॥३६॥ पूर्वोक्त मानतोज्येष्ठः क्षोडशांशाधिको
भवेत्। दन्तांशेनतु मध्योऽस्य नवांशैरुदयो भवेत्॥३७॥ ग्रीवापीठं भवेद्भागं त्रिभागेनाडकं तथा।
काशिकं भागतुल्यं च त्रिभागं बीजपूरकं॥३८॥ एकांशमग्रे द्वौ मूले वह्निवेदांश कर्णिकौ। ग्रीवा द्वौ

पीठमर्धं द्वौ षडंशा विस्तरे रुदयं॥३९॥ इति कलशः॥ दण्डः कार्य स्तृतीयांशो शिलातः कलशाव
धेः। मध्याष्टांशेन हीनोऽसौज्येष्ठात् प्रादोनकन्यसः॥४०॥ प्रासादव्यास मानेन दण्डोज्येष्ठः प्र
कीर्त्तितः। मध्यो हीनो दशांशेन पंचमांशेनकन्यसः॥४१॥ एकहस्त सुरागारे दण्डं पादोनमंगुलं।
कुर्यादर्धांगुलं वृद्धिं यावत् पंचदशांगुलं॥४२॥ सुवृत्तः सारदारुश्च ग्रंथिकोटर वर्जितः। पर्वभि
र्विषमैः कार्यः सन्मग्रंथिः सुखावहः॥४३॥ दण्डैर्घ्यं षडंशेन मर्कध्वार्धार विस्तृता॥ अर्धचन्द्राकृतिः
पार्श्वे घंटी ध्वं कलशस्तथा॥४४॥ ध्वजदण्ड प्रमाणेन दैर्घ्येऽष्टांशेन विस्तरे। नावस्त्रीवीच विज्ञाद्या
त्रिपंचाग्रशिखोपमा॥४५॥ पुरेच नगरे काटे रथे राजगृहे तथा। वापी कूप तडागेषु ध्वजा कार्या सु
शोभना॥४६॥ निष्पन्नं शिखरं दृष्ट्वा ध्वजहीनं नकारयेत्। असुरा वास मिच्छन्ति ध्वजहीने सुरालये॥४७॥

ध्रुवजोच्छ्रायेण तुष्यन्ति मे देवाश्च पितरस्तथा। दशाश्वमेधिकं पुण्यं सर्वतीर्थधराधिकं॥४८॥ पंचाशत पूर्वतः पश्चात आत्मानंच तथाधिकं। शतमेकोत्तरं सोपि तारयेन्नरकार्णवात्॥४९॥ इतिध्रुवजलक्षणं पुरुष्याधिकारः॥ इति श्रीप्रासादमण्डने सूत्रधार श्रीमण्डन विरचिते वास्तुशास्त्रे प्रतिमाप्रमाणे दृष्टिस्थान शिखर ध्वजकलशलक्षणाधिकार श्चतुर्थोऽध्यायः॥४॥ नानाविधमिदं विश्वं विचित्रं येन सूत्रितं। सूत्रधारः श्रिये सोस्तु सर्वेषां पालनक्षमः॥१॥न्यूनाधिकं प्रसिद्धंच यत किंचिन्मयानोदितं। विश्वकर्म्म प्रसादेन शिल्पिनो मान्यता वचः॥२॥ चतुर्भागं समारभ्य यावत सूर्योत्तरं शतं। भागसंस्थेति विख्याता फालनाकर्षवाचकः॥३॥ अष्टोत्तर शतं भेदा अंशवृद्धया भवन्ति ते। समांशै र्विषमैः कार्या नन्तभेदैश्च फालना॥४॥ एकस्यापि तलस्थोर्ध्वे पराणि बहून्यपि। नामानि जातयस्तेषां

मूर्ध्नि मार्गानुसारतः॥५॥ दशहस्तादधो नस्यात् प्रासादो भ्रमसंयुतः। नवाष्ट दशभागेषु भ्रमो भित्तिर्विधीयते॥६॥ विराज्य श्चतुरस्त्रस्तु चतुर्द्वारः चतुःशिकाः। प्रासादो ब्रह्मणः प्रोक्तो धीमता विश्वकर्म्मणा॥७॥ सप्तादशिखरं कार्यं घंटाकलशभूषितं। चतुर्भिः शुकनासैस्तु सिंहकर्णैर्विराजितं॥८॥ एकद्वारं भवेत् पूर्वं द्विद्वारं पूर्वपश्चिमौ। त्रिद्वारं उत्तरं मध्य ध्वजारं दक्षिणवर्जितं॥९॥ चतुर्द्वारं चतुर्दिक्षु शिवब्रह्म जिनालयं। होमशाला प्रकर्त्तव्या कश्चिद्राजगृहं तथा॥१०॥ वैराजाद्याः समुत्पन्नाः प्रासादा ब्रह्मणा चिंताः। एकत्रिंचसप्तांक संख्याभैः पंचविंशतिः॥११॥ चतुर्भद्रे भवेत्कोणे भागो भद्रं द्विभागिकं। भागार्धं निर्गमं भद्रे प्रकुर्यान्मुखभद्रकं॥१२॥ शृंगमेकं भवेत्कोणे द्वे द्वे भद्रे चनन्दनं। इतिनन्दनं तथाचोक्तं। मुखे भद्रे प्रतीभद्रमुद्गमो रथिकोपरि। कर्णशृंगे सिंहकर्ण

सिंहनासस्तदुच्यते ॥१३॥ देवानांतु प्रकर्त्तव्यं सिंहस्तत्रैव स्थापितः। तुष्यते गिरिजा तस्य सौभाग्यधनपुत्र
कैः ॥१४॥ रथिका सिंहकर्णंच भद्रे शृंगेच सिंहकं ॥ इतिसिंहः ॥१५॥ कर्णशृंगन्तु पंचांशं सश्रीनद्दन
उच्यते ॥ त्र्यंग इत्यथ षड्भागै श्चतुरस्रं विभाजयेत् ॥१६॥ कर्ण प्रतिरथं कुर्यात् भद्रार्धं भागभागिकं। सम
निर्गम मस्तात्र भद्रं भागार्धनिर्गमः ॥१७॥ द्वे द्वे कर्णौ तथा भद्रे एकं शृङ्गं प्रतीरथे। मेदिं तृतीयं
भद्रमलये ~~तृतीयं~~ भद्रजं त्यजेत् ॥१८॥ प्रत्यंगं तिलकं कुर्यात् प्रतीरथे विमानकः। भद्रेऽ शृंग वैशाल
प्रतिरथं सुभूषणं ॥१९॥ इति पंचांगाः पंच ॥ चतस्रेऽष्टभिर्भक्ते कर्णाः प्रतिरथं रथं। भद्रार्धं भाग
भागंच भागार्धेन विनिर्गमः ॥२०॥ वारिमार्गान्तरयुता रथाश्च तुल्यनिर्गमाः। शृंगयुग्मंच तिलकं कर्णौ
द्वेतु प्रतीरथे ॥२१॥ एकंचोपरथे भद्रे ~~-~~ त्रीणि चतुर्दश। शिखरं पंचविस्तारं महेन्द्रो राज्यदो नृणां ॥२२॥

कर्णौ शृंग त्रयं शेषं पूर्ववद्वृत्त शीर्षकः। त्यक्तैकशृंगं भद्रस्य मत्तालम्बन्तु कारयेत् ॥२३॥ मस्तके तस्य दक्ष
अस्या शृंगयुग्मं प्रदापयेत्। सितशृंगस्तदा नाम ईश्वरस्य सदाप्रियः ॥२४॥ तिलकं यद्युपरथे भूधरो
नाम नामतः। द्व्यंश शृंगे तु तिलकं नाम्ना भुवनमंडनः ॥२५॥ शृंग द्वयं चोपरथे तिलकं कारयेत्सुधीः।
त्रैलोक्य विजयो भद्रे शृंगेण क्षितिवल्लभः ॥२६॥ इति सप्तांगाः ॥ दशभाग कृते क्षेत्रे भद्रार्धं भागमानतः।
त्रयं प्रतिरथे कर्णौ कर्णौ भागोत्तमो भवेत् ॥२७॥ कर्ण प्रतिरथे भद्रे द्वे द्वे शृंगे प्रकारयेत्। रथोप
रि स्यात् तिलकं प्रत्यंगं च रथोपरि ॥२८॥ मतोलंबयुतं भद्रं प्रासादेऽयं महीधरः। भद्रशृंगे तृतीयं च
कैलासः शंकरप्रियः ॥२९॥ भद्रेत्यक्तारथे शृंगं नवमालः समुच्यते। तथा भद्रे पुनर्दद्यात्तदा सौगंधमा
दनः ॥३०॥ भद्रे त्यक्ता चोपरथे शृंगं सर्वांगसुन्दरं। भद्रे दद्यात् पुनः शृंगं विजयानन्द उच्यते ॥३१॥ मत्ता

लम्बयुतं भद्रमुरुशृंगं मारित्यजेत्। शृंगद्वयंच ऊर्ध्वाधो सर्वांगतिलकस्तदा॥२१॥ उरुशृंगं ततोदद्यात
मत्तालम्बसमन्वितं। महाभोगस्तदा नाम सर्वकामफलप्रदः॥२२॥ कर्णे प्रतिरथे चैकं रथेनूपरथा
दिषु। मेरुश्रेष्ठ समाख्यातः सर्वदेवैः सुपूजितः॥२४॥ प्रदक्षिणत्रये स्वर्गमेरोः पुंसांच यत् फलं। इष्ट
काशैलजे मेरौ स्यात प्रदक्षिणकेसरे॥२५॥ वैराज्यप्रमुखा मेचनागरा ब्रह्मणोदिताः। वल्लभाः सर्व
देवानां शिवस्यापि विशेषतः॥२६॥ "इति प्रासादमण्डने सूत्रधार श्रीमण्डन विरचिते वास्तुशास्त्रे
वैराज्यादि प्रासादपंचविंशत्यधिकारः पंचमोऽध्यायः॥ "केसरी सर्वतोभद्रो नन्दनो नन्दशा
लकः। नन्दीशो मन्दिरश्चैव श्रीवृक्षश्चामृतोद्भवः॥२॥ हेमवान् हेमकूटश्च कैलाशः पृथिवीजयः। इन्द्र
नीलो महानीलः भूधरो रुलकूटकः॥२॥ वैदूर्यः पद्मरागश्च कलशो मुकुटोज्वलः। रेरावतो राजहंसो गरुड़ो

वृषभध्वजः॥३॥ मेरुः प्रासादराजश्च देवानामालयो हि सः। ब्रह्मविष्णुशिवार्कार्णां नान्येषांचकदाचन॥
४॥ आद्यः पंचांडको ज्ञेयः केसरी नामनामतः। चतुर्णां क्रमतोवृद्धि र्यावदेवोत्तरं शतं॥५॥ त्रैत्रेऽष्टांशे
विभक्तेतु कर्णो भागद्वयं भवेत्। भद्रार्धे करणतुल्यन्तु भागेनैकेन निर्गतं॥६॥ दशांशे सार्धभागंच
भद्रार्धे च प्रतीरथः। कर्णो द्विभागसूर्यांशे भद्रार्धं प्रतिरथकः॥७॥ चतुर्दश विभक्तेतु कर्णार्धं द्वादशां
शवत्। भद्रपार्श्वद्वये कार्या भागभागेन नन्दिका॥८॥ षोडशांशे प्रकर्त्तव्या कर्णः प्रतिरथान्तरे। को
णिका भागतुल्याच शेषं चतुर्दशांशवत्॥९॥ अष्टादशांशे भद्रस्य पार्श्वे द्वे द्वे च कर्णिके। कर्त्तभाग
भागेच शेषः स्यात षोडशांशवत॥१०॥ चतुरस्रीकृते क्षेत्रे विंशत्यंश विभाजिते। कर्णो द्विभागः कोणीच
सार्धांशा पृथुविस्तरे॥११॥ द्विभोगस्तु प्रतिरथो नन्दिका सार्धभागिका। भद्रनन्दौ भवेद्भागा भद्रार्धे युग्म

भागिकं ॥२२॥ द्वाविंशत्यंशके नन्दी भागैका भद्रपार्श्वयोः। त्रयः प्रतिरथाः कर्णौ भद्रार्धं च द्विभागिकं॥
२३॥ एकद्वित्रिकं वेदाश्च त्रीणि चत्वारि पंचच। तलेषु क्रमतोऽष्टासु केचिदाहुः शिखराणि हि॥२४॥शिखरं
लेकवेदैक षट् त्रिवेद युग द्वयं। तलेषु क्रमतः प्रोक्तं मूलसूत्रे परा जिते॥२५॥ तलेष्वष्टासु विहिताः प्रासा
दाः पंचविंशतिः। त्रय स्त्रयः क्रमे सौव चत्वारस्त्वष्टमे तले॥२६॥ त्रीणि त्रीणि स्वकीयानि द्वे द्वे तु परमस्य
च। शिखराणि विधेयानि विश्वकर्म्म वचोयथा॥२७॥ द्वित्र्येक षट् त्रयोष्टादि तलेषु पंचसु क्रमात्। स
प्तैव सप्तमे त्रष्टे शिखांसि त्रीणि चाष्टमे॥२८॥ भेदाः पंचाशदेकैकस्योक्ताः श्री विश्वकर्म्मणा। तेमैकस्मिं
स्तलेऽपि स्यु शिखराणि बहून्यपि॥२९॥ रथिकांसिंहकर्णं च भद्रे कुर्याद्यथोचितान्। प्रसङ्गैस्तिल
काद्यैश्च शोभितं सुरमन्दिरं॥२०॥ प्रासादाः केसरिमुखाः सर्वे देवेषु पूजिताः। पुरराज्ञः प्रजादीनां कर्तुः

कल्याणकारकाः॥२१॥ इति केसर्यादि प्रासादाः पंचविंशतिः॥ षट्त्रिंशत्करमाधस्ताद्यावद्भस्तचतुष्टयं।
विनाभ्रमै निराधारः कर्त्तव्यः शान्तिमिच्छता॥२२॥ वास्तोः पंचविधं क्षेत्रं चतुरस्रमथायतं। वृत्तं वृत्तायतं
चैवाष्टास्रं देवालयादिषु॥२३॥ विस्तारेतु चतुर्भागआयामे पंचभागिके। ऊर्ध्वे त्रिकलसान कुर्यात
पृष्ठेऽग्रे सिंहकर्णकं॥२४॥ वृत्तायतेऽथ कर्त्तव्यं व्यासार्धं वामदक्षिणे। कर्णान्ते भ्रामयेत्सूत्रं वृत्तेभे
द्राणि चाष्टहि॥२५॥ प्रासादो वसुलोऽष्टास्रः प्रायेणैकाण्डकः शुभः। केसरीच त्रयोण्डानां मरुपंतत
स्वरूपकं॥२६॥ इति पंचक्षेत्राणि॥ विचित्रैरुपसंधातैर्मंडपैर्गवाक्षभूषितैः। वितानफालनाशृंगैरनेकै
नागरा मताः॥२७॥ पीठोपरि भवेद्वेदी पीठानि त्रीणि पंचवा। पीठते द्राविडे रेखा लतशृंगादिसंयुताः॥
२८॥ भूतिकोपरि भूमिस्तु द्वेत्वाद्वेत्वा नवान्तकं। विभक्तिदलसंयुतां मूर्ध्नि शृंगेण भूमिजा॥२९॥

शृंगे नैके नलतिना श्रीवत्सवारि संयुता। नागरा भ्रम संयुक्ता साधारा स्तो प्रकीर्तिताः॥३०॥ इति प्रासाद जातयः॥ पंचहस्तो भवेन्मेरु र्कोत्तरशतायुकः। भेदाः पंचो न पंचाशत् कर वृद्धा भवन्ति ते॥३१॥ हस्ते हस्ते भवे द्वृद्धि स्त्रयुकानां च विंशतिः। एकोत्तरसहस्रं स्यात् शृंगाणां च शतार्धके॥३२॥ केशरि प्रमुखं कर्णे विमानं चोरु शृंगके। तथैव मूलशिखरं पंच भूमि विमानकं॥३३॥ विमान नागराजातिस्तदा प्राग्वै कुदाहृता। एवं शृंगेष शृंगाणि संभवन्ति बहून्यपि॥३४॥ श्रीमेरुरष्ट भागः स्यादेकोत्तरशतायुकः। हेमशीर्षो दशांशश्च युतः सार्धशतायुकैः॥३५॥ भागै र्द्वादशभि युक्तः सार्धद्विशतसंयुतः। सुरवल्लभनामातु प्रोक्तः श्रीविश्वकर्मणा॥३६॥ कोणे द्विभाग एकांशा कोणी सार्धद्वितीयकः। अर्धांशा नन्दिका भद्रमर्धभागेन संमितं॥३७॥ त्रिंशता पंचसप्तत्याधिकं यत्रायुकानि हि। भक्ताश्चतुर्दशांशैस्तु

नाम्ना भुवन मण्डनः॥३८॥ कोणः कोणी प्रतिरथो नन्दी भद्रार्ध मेवच। द्व्येकद्व्यर्धत्रिसार्धांशै श्चतुर्दश विभाजितैः॥३९॥ वाणैकवेदयुग्मांशै र्वेदाः कर्णादि गर्भतः। रुद्रशीर्षो भवेन्मेरुः पंचशतैक शृंगकैः॥४०॥ खाणैक युग्मचन्द्रा द्यै पुराणांशै विभाजिते। नाम्ना किरणै श्चैव मेरु श्च सपादः षट्शतायुकः॥४१॥ रामचन्द्रद्वि युग्मांशै र्नेत्रेषुभि विभाजिते। नाम्नाकमल हंसः स्यात् सार्धसप्तशतायुकः॥४२॥ भागैः कर्णादि गर्भान्तं वेदसार्ध त्रिसार्धकैः। द्व्याभ्यां च स्वर्णकेतुश्च पंचसप्ताष्ट शृंगकैः॥४३॥ वेदैक राम युग्मांशनेत्रै र्जिन विभाजिते। वृषभध्वजमेरुश्च सैकाणुकसहस्रवान्॥४४॥ सभ्रमो भ्रमहीनश्च महामेरौ भ्रम द्वयं। साधारेषु प्रकर्त्तव्यं भद्रे चन्द्रावलोकनं॥४५॥ राज्ञः स्यात् प्रथमं मेरु स्ततो हीनो द्विजादिषु। विनाराज्ञान्यवर्णेन कृते मेरौ महद्भयं॥ इतिनव मेरुलक्षणं॥ इति प्रासादमण्डने सूत्रधार श्रीमण्डन

विरचिते वास्तुशास्त्रे केसर्यादि प्रासादलक्षणं पंचचैत्र पंचचत्वारिंशन्मेरुलक्षणे षष्ठोऽध्यायः॥ ६॥
रत्नगर्भा करणी सूर्य चन्द्रतारा वितानकं। विचित्रमण्डपं येन कृतं तस्मै नमः सदा॥१॥ करणी गूढो विलो
कश्च एकत्रि द्वार संयुतः। प्रासादाग्रे प्रकर्तव्यः सर्वदेवेषु मण्डपः॥२॥ गूढस्त्रिकस्तथा मृत्यः
क्रमेण मण्डपास्त्रयः। जिनस्याग्रे प्रकर्तव्या सर्वेषांनु वलानकं॥३॥ समं सपाद प्रासादात् सार्धं
पादोन तद्द्वयं। द्विगुणं वा प्रकर्तव्यं मण्डपं पंचधा मतं॥४॥ समं सपाद पंचाशत् पर्यन्तं दशहस्ततः।
दशांतं पंचतः सार्धं द्विपादो नंचतुः करे॥५॥ त्रिहस्ते द्विगुणं ह्येक हस्ते कुर्याच्चतष्ककं। प्रायेण मण्डपं
सार्धं द्विगुणं प्रसलिन्दकौ॥६॥ मण्डपैः स्तम्भपादार्धं मध्यपादानुसारतः। शुकनासः समार्धंटा
न्यूना श्रेष्ठा नचाधिका॥७॥ मुखमण्डप संघातो यदा भित्त्यन्तरे भवेत्। न दोषः स्तम्भपादार्धे समेवा

विषमे तले॥८॥ नवाष्ट दशभागेषु त्रिभिश्चरुद्वावलोकनं। हस्तैकं त्र्यंगुलोनं वा तदूर्ध्वे मत्तवारणः॥९॥
सार्धपंचाशंकैर्भक्ते सपाद राजसेनकं। सपादत्र्यंको वेदीभागे नासनपट्टकं॥१०॥ तदूर्ध्वे सप्तसार्धांशै
र्यावत्पट्टस्य पेटकं। सार्धपंचाशकैः स्तम्भः पादोनं भद्रणं भवेत्॥११॥ भागार्धं भद्रणं वापि सपाद सार्धतः
शिरः। पट्टो द्विभाग स्तस्योर्ध्वे कर्तव्यः छाद्यकोदयः॥१२॥ त्रिभागे ललन छाद्यं तत्पेटं पट्ट पेटको अर्धां
शोर्ध्वे कपोताली द्विभागः पट्ट विस्तरः॥१३॥ प्रासाद दशरुद्रार्कभागेन स्तम्भ विस्तरः। वेदाष्टरविविंशत्या
करणीवृत्तास्तु पंचधा॥१४॥ द्वाराग्रे स्तम्भवेद्याद्याः प्राग्रीवो मण्डपो भवेत्। द्वि द्वि स्तम्भविवृद्धा च षोड
शैव प्रकीर्तिताः॥१५॥ भित्तिप्रासादवद्भूढे मण्डपेऽष्ट विधेषु च। चतुरस्रः सुनन्दश्च तथा प्रतिरथा
न्वितः॥१६॥ मुखभद्रयुतोवापि द्वित्रि प्रतिरथैर्युतः। करणीदकान्वरेणाथ भद्रोदक विभूषितः॥१७॥

दले नार्धेन पादेन दलस्य निर्गमो भवेत्। मूल प्रासादवद् बाह्ये परि जंघादि मेखलाः॥१८॥ शंवाचेना न्वितं भद्रमथजालक संयुतं। गूढेऽथ कर्णे गूढे वा भद्रे चन्द्रावलोकनं॥१९॥ त्रिद्वारे चैक वक्त्रे च मुखेका यी चतुः किका। गूढे प्रकाशके वृत्त मधोदय करोटकं॥२०॥ इत्यष्ट गूढ मण्डपाः॥ एक त्रि वेद षट्स प्तांक चतुर्दश त्रिकत्रये। अग्रे भद्रं विना पार्श्वे पार्श्वयोरग्रतथा॥२१॥ अग्रतस्त्रि चतुः पंच तथा पार्श्वे द्वये पिच। मुक्तकोणे चतुष्कौ द्वे इतिं द्वादश मण्डपाः॥२२॥ गूढस्याग्रे प्रकर्त्तव्या नाना चतुष्किकान्विताः। चतुरस्रादि भेदेन वितानैर्बहुभि युता॥२३॥ इति द्वादश मण्डपाः॥ त्रिकाग्रे रंग भूमिर्या तत्रवै नृत्य मण्डपान्। प्रासादाग्रेऽथ सर्वत्र तान् प्रकुर्या द्विधा मतः॥२४॥ सप्तविंशति कुक्षौ ये मण्डपा विश्वकर्म णा। तलैश्च विषमै स्तुल्यै हस्तैः स्तम्भैः समै स्तथा॥२५॥ प्रथमो द्वादश स्तम्भो द्वि द्वि स्तम्भ विवर्धनात्।

यावत् षष्टिश्चतुर्युक्ता सप्तविंशति मण्डपाः॥२६॥ क्षेत्रार्धस्य षडंशोना चैका सा षष्टा सउच्यते। कलासै क्षेत्रभेदज्ञा तत षडंशेन संयुताः॥२७॥ अष्टास्रं षोडशास्रं च वृत्तं कुर्यात्तदूर्ध्वतः। उदयं निस्तरार्धेन षष्ट पंचाशता भवेत्॥२८॥ कर्णा दर्द्धरिका सप्त भागेन निर्गमो श्रिताः। कूपकंठ स्तु पंचांशो द्विभागे नात्र निर्गमः॥२९॥ विद्याधरैः समायुक्तं षोडशाष्ट दिवाकरैः। जिन संख्या मितैर्वापि दन्त तुल्यै विरा जितं॥३०॥ विद्याधरः पृथुश्चैव सप्तांशो निर्गमे दश। तदूर्ध्वे चित्र रूपाश्च नर्त्तका नृत्य शोभिताः॥३१॥ गज तालुस्तु षट् सार्धः प्रथमा द्वितीयातु षट्। तृतीया सार्ध पंचाशा कोलानि त्रीणि पंचच॥३२॥ मध्ये वितानं कर्त्तव्यं चित्र वर्णै विराजितं। नाटकादि कथा रूपै र्नानाकारै र्विराजितं॥३३॥ एकादि दश शतान्येव वितानानां त्रयोदश। शुद्ध संधाट मिश्राणि छिप्रो छिप्राणि यानिच॥३४॥ वितानानि विचित्राणि

वस्त्र चित्रादि भेदतः। तानिलोके प्रवर्त्तन्ते तस्मा द्वत्यानि लोक तः॥३५॥ मण्डपेषुच सर्वेषु पीठानेरंगभूमिकं। कुर्याद्वुत्तान प्रादेच चित्र पाषाणजेनच॥३६॥ इतिमण्डप प्राः॥ बलानंदेच गेहाग्रे राजद्वारे गृहे पुरे। जलाशयेऽथ कर्त्तव्यं सर्वेषां सुख मण्डनं॥३७॥ जगतीप्रादविस्तीर्णं प्रादप्रादेन वर्जितं। शालिन्देन गर्भेण प्रासादेन समंभवेत्॥३८॥ उत्तमे कन्यसं मध्ये मध्यंज्येष्ठेतु कन्यसं। एकद्वित्रिचतुः पंच दस सप्तपदान्तरे॥३९॥ मूल प्रासादवद्द्वारं मण्डपे च बलाणकं। न्यूनाधिकं न कर्त्तव्यं दैर्घ्ये हस्ता चुलाधिकं॥४०॥ पेढके चोत्तरंगाणं सर्वेषां समसूत्रतः। अंगशोन समं पट्टं जगत्याश्चोत्तरंगजं॥४१॥ जगत्यग्रे चतुष्कीया वामनं तद्बलाणकं॥ ~~न्यूनाधिकं नकर्त्तव्यं दैर्घ्ये हस्ता चुलाधिकं॥४२॥ वामेऽथ~~ दक्षिणे द्वारा द्वैदिका मत्तवारणं॥४२॥ ऊर्ध्वा भूमिः प्रकर्त्तव्या तृल्य मण्डप सूत्रतः। मत्तवारणकंवेदि

वितानतोरणैर्युता॥४३॥ राजद्वारे बलानेव पंच वा सप्त भूमिका। तद्विमानं बुधैः प्रोक्तं पुष्करं वारि मध्यतः॥४४॥ हर्म्यं जाड्य गृहेवापि कर्त्तव्यं गोपुराकृति। एकभूमे स्त्रिभूमान्तं गृहद्वाराग्रम स्तके॥४५॥ इति पंचबलाणकं॥ संवरणा प्रकर्त्तव्या प्रथमा पंचधंटिका। चतुर्धंदामिवृद्धिंच यावदेकोत्तरंशतं॥४६॥ पंचविंशतिरित्युक्ता प्रथमा वसुभागिका। वेदोत्तरं शतं यावत् वेदंशावृद्धिरिष्यते॥४७॥ भद्रार्धे रथिकार्धेन नवांगं वामदक्षिणे। अर्धोदयेन रथिका घंटाकूटं नवांगकं॥४८॥ कलाकूटान्विता पूर्वा पंचभिः कलसै र्युता। भागैस्तुलैस्तथासिंहै रेवमन्याश्चलक्षतः॥४९॥ इतिप्रासाद मण्डने सूत्रधार श्रीमण्डन विरचिते मण्डप बलाणक सवरणाधिकारः सप्तमोऽध्यायः॥७॥ इतिसाधारणाध्यायः सर्वलक्षण संयुतः। विश्वकर्म्म प्रसादेन विशेषेण प्रकथ्यते॥१॥ मानं न्यूनाधिकं

वापि स्वयंभू बाण रत्नजे। धृष्टितेषु विधातव्य मर्चा लिंगेषु शस्यतः॥२॥ बहुलेप मल्पले पंच समसः
शिरोयुतः। साशिल्पं पादहीनं यत्तच्च वास्तु विनश्यति॥३॥ अन्यवास्तु चिते द्रव्ये अन्य वास्तु निवेशिते।
प्रासादे नभवेत् पुण्यं गृहेषु नवसेत् पतिः॥४॥ स्वस्थाने संस्थितं यच्च विप्रवास्तु शिवालयं।
अचाल्यं सर्वदेशेषु चालिते राष्ट्र विभ्रमः॥५॥ वापीकूपतडागानि प्रासादभुवनानिच। जीर्णो
द्धरते यस्तु पुण्य मष्टगुणं भवेत्॥६॥ तद्भग्नं तत् प्रमाणं स्यात् पूर्वसूत्रं नचालयेत्। हीनेतु जा
यते हानि राधिके स्वजनक्षयं॥७॥ वास्तु द्रव्याधिकं कुर्यात् मृत्काष्ठ शिलजं विना। शैलजे धातु
जे चैव धातुजं रत्नजे तथा॥८॥ पूर्वोत्तर दिशा मूढं मूढं पश्चिम दक्षिणे। तन्न मूढं समूढंवा
यत्र तीर्थं समाहितं॥९॥ सिद्धायतन तीर्थेषु नदीनां संगमेषुच। स्वयंभूबाण लिंगेषु तच्च
दोषो न विद्यते॥१०॥ विषमस्थानमाश्रित्य भग्नं यत् स्थापितं परैः। तत्र स्थानस्थिता देवा भग्नाः
पूज्याः फलप्रदाः॥११॥ अन्यत्र मृन्मयं बाल्यं त्रिरत्नोत्तन्तु शैलजं। दारुजं पुरुषार्धे हि अत
ऊर्ध्वं नचालयेत्॥१२॥ यद्यथा स्थापितं वास्तु तत्तथैवहि कारयेत्। अल्पांगं चालितं वास्तु
दारुणं कुरुते भयं॥१३॥ अथतच्चालयेत् प्राज्ञो जीर्णं भंगंच दूषितं। आचार्यैः शिल्पिभिः प्राज्ञैः
शास्त्रदृष्ट्या समुद्धरेत्॥१४॥ स्वर्णजं रूप्यजं वापि कुमीनागमथोवृषं। तस्मा शृंगेन दंतेन
पातितं पातयेन् सुधीः॥१५॥ इतिजीर्णभग्नपातन विधिः॥ मरणुलंजालकं चैव कीलकं सु
षिरं तथा। छिद्रसन्धिश्च गारश्च महादोषा इतिस्मृताः॥१६॥ भिन्नं दोषकरं यस्मात् प्रा
सादमठमन्दिरं। मूषाभि जालकै र्द्वारै रश्मिवातैः प्रभेदितं॥१७॥ ब्रह्म विष्णु शिवाकीर्णं

भिन्नं दोषकरं नाहि। जिनगौरीगणेशानां गृहं भिन्नं विवर्जयेत्॥१८॥ शक्तावद्य तं गृहं कुर्यात् अभिन्नाभिन्नमूर्तिकं। यथास्वामिशरीरं च प्रासादं चैव तादृशं॥१९॥ इति भिन्नदोषः॥ भिन्नं चतुर्विधं ज्ञेयं मश्रुधा मिश्रकं मतं। मिश्रकं पूजितं तत्र भिन्नं वै दोषकारकं॥२०॥ छेदभेदो न कर्त्तव्यो जातिभेदोऽथवा पुनः। उत्पद्यते महानर्थो जातिभेदे कृते सति॥२१॥ द्वारहीने हीनचक्षुर्नासिहीने धनक्षयः। अधस्थापितैः स्तम्भैः महारोगं विनिर्दिशेत्॥२२॥ स्तम्भ नासो द्वये हीने कर्त्तो तत्र विनश्यति। प्रासादे पीठहीने तु नश्यन्ति गजवाजिनः॥२३॥ रथोपरथहीनेतु प्रजापीडां विनिर्दिशेत्। कर्णहीनेतु प्रासादे फलं क्वापि न विद्यते॥२४॥ जंघाहीने हरेद्बुद्धिं कर्त्तीकारापराधिकान्। शिखरे हीनभागेतु पुत्रपौत्रं न विद्यते॥२५॥ अति दीर्घे

कुले छेदो ह्रस्वे व्याधिं विनिर्दिशेत्। तस्मात् शास्त्रोक्तमानेन सुखदं सर्वकामदं॥२६॥ जगत्यां नलीपर्येच्छालां शालया चैव मण्डपे। मण्डपे नच प्रासादो ह्यस्तोवै दोषकारकः॥२७॥ इतिदोषाः॥ प्रासादोच्छ्रयविस्तारो जगतीवामदक्षिणे। छाद्यभेदा न कर्त्तव्या तथा लिंगस्य पीठिका॥२८॥ जगत्यास्त्रिचतुःपंचगुणं देवपुरं त्रिधा। एकद्विवेदसाहस्रहस्तैः स्याद्राजमन्दिरं॥२९॥ कलाष्टवेदसाहस्रैर्हस्तैराजपुरं समं। दैर्घ्ये तुल्यं सपादाष्टसार्धांशेधिकं शुभं॥३०॥ द्वादशत्रपुराणि स्युर्देवस्थानानि चक्रिरे। षट्त्रिंशतः प्रबुधायावृद्धिरुत्तोत्तरं शतं॥३१॥ पुरं प्रासादहर्म्यैः स्यात्सौधैर्जालैर्गवाक्षकैः। कीर्तिस्तम्भैर्जलाशयैर्गूढैर्नालैश्च शोभितं॥३२॥ इतिदेवपुरराजपुराणि॥ प्रासादस्योत्तरे सौम्ये तथाग्नौ पश्चिमेपिवा। यतीनामाश्रयं कुर्यात्

मठन्तु द्वि त्रि भूमिकं ॥३२॥ द्विशालं मध्य षट् दारु पट्ट शालाग्रशोभितं। प्रत्नवारण मग्रेच
तच्चदूर्ध्वासु भूमिषु ॥३४॥ काष्ठागारं च वायव्ये वह्नि कोणे महानसं। पुष्पगेहं तथैशाने नैर्ऋत्ये
पात्रमायुधं ॥३५॥ सत्रागारं च पुरतो वारुण्यां च जलाशयं। मठस्य परितः कुर्यात विद्याव्याख्या-
न मण्डपं ॥३६॥ इति मठः॥ पूर्वोक्ताः सप्त पुरुषाई प्रतिष्ठाः सर्व सिद्धिदा। रवौ सौम्यायनेकुर्यात
देवानां स्थापनादिकं ॥३७॥ प्रतिष्ठा चोत्तराभूले चाद्रियां च पुनर्वसौ। पुष्ये हस्ते मृगे स्वातौ
रौहिण्यां श्रुति मैत्रभे ॥३८॥ तिथिं रिक्तां कुजं धिष्ण्यं क्रूर विद्धं युतं तथा। दग्धां तिथिंच गण्डान्तं
चरभोपग्रहं त्यजेत् ॥३९॥ सुदिने सुमुहूर्तेच लग्ने सौम्य युते क्षिते। अभिषेकः प्रतिष्ठाच प्रवे
शादिकमिष्यते ॥४०॥ प्रासादाग्रे तथैशाने उत्तरे मण्डपं शुभं। त्रिपंचसप्तनन्नैकादश विश्वकरा

न्तरं ॥४१॥ मण्डपः स्यात करैरष्टादश सूर्य कलामितैः। षोडश हस्ततः कुण्डं दशाधिकमिष्यते
॥४२॥ स्तम्भ षोडश संयुक्तं तोरणादि विराजितं। मण्डपं वेदिकामध्ये पंचाष्ट नवकुण्डकं ॥४३॥
हस्तमात्रं भवेत् कुण्डं मेखला योनि संयुतं। अग्नये वेद मंत्रैश्च होमं कुर्याद्विधानतः ॥४४॥
अयुते हस्तमात्रं तु लक्षार्धे तु द्विहस्तकं। त्रिहस्तं लक्षहोमे स्याद्दशलक्षे चतुःकरं ॥४५॥ त्रिंश
लक्षे पंचहस्तं कोट्यर्धे षट्करं मतं। सप्तहस्तं कोटि होमे करास्टकं ॥४६॥ गृहपू
जाविधानेच कुण्डमेककरं भवेत। मेखला त्रितयं वेदरामयुग्मांगुलैः क्रमात ॥४७॥ एक
द्वित्रिकरं कुर्यात वेदिकोपरि मण्डलं। ब्रह्मविष्णुरवीनान्तु सर्वतोभद्रमिष्यते ॥४८॥ भद्रं
तु सर्वदेवानां नवनाभिस्तथात्रयं। लिंगोद्भवं शिवस्यापि लतालिंगोद्भवं तथा ॥४९॥ भद्रं

गौरी तिलकं देवीनां पूजनेहितो। अर्धचन्द्रं तडागेषु चापाकारं तथैवच॥ ५०॥ ढंकाभं स्वस्तिकं चैव वापी कूपेषु पूजयेत्। पीठिकां जलपट्टेतु योन्याकारं तु कारयेत्॥ ५१॥ गजदन्तं महादुर्गे प्रशस्तं मण्डलं यजेत्। ढंकारं चक्रसंज्ञं च गजदन्तमिहायतं॥ ५२॥ विख्यातं सर्वतो भद्रं ज्ञेयान्यान्यानि लोकतः। पूर्वादि तोरणं लक्ष्म यज्ञांगं वटपिप्पलैः॥ ५३॥ द्वात्रिंशत् क्षौद्रशाष्टौच ऋत्विजो वेदपारगान्। कुलीनान् ज्ञानसंपूर्णान् यज्ञार्थे अभिमन्त्रयेत्। ५४॥ मण्डपस्य त्रिभागेन उत्तरे स्नानमण्डपं। स्थापयेत् वालुकं कृत्वा शय्यायां स्नापयेत् सुरं॥ ५५॥ पंचयज्ञैः कषायैश्च वल्कलैः क्षीरवृक्षजैः। स्नापयेत् पंचकलसैः शतवारं जलेनच॥ ५६॥ देवमंत्रैश्च वादित्रगीतमंगलनिस्वनैः।

वस्त्रेणाच्छादये दीशं वेद्यां तं मण्डपं नयेत्॥ ५७॥ तुल्यामारोपयेद्वेद्या मुत्तरा विन्यसेत्ततः॥ कलशान्तु शिरोदेशे पादस्थाने कमण्डलुं॥ ५८॥ व्यजनं दक्षिणे देशे दर्पणं वामतः शुभं। रत्नन्यासं ततःकुर्यात् दिक्पालादिक पूजनं॥ ५९॥ वज्रं वैदूर्यकं मुक्ता मिन्द्रनील सुनीलकं। पुष्परागं चगोमेदं च प्रं पूर्वादितोन्यसेत्॥ ६०॥ सुवर्णं रजतं ताम्रं कांस्यं रीतिं चशीसकं। वंगं लोहंच पूर्वादेः सृष्ट्या धातू निहन्यसेत्॥ ६१॥ वज्री वह्निः सहदेवी विष्णुक्रांतेन्द्रवारुणी। शंखिनी ज्योतिष्मतीचैव इत्येवं ताः क्रमान्न्यसेत्॥ ६२॥ यवो व्रीहिस्तथाकंगू चूर्णं द्वयं तिलैर्युतं। शालिमुद्गा समाख्याता गोधूमाश्च क्रमेणहि॥ ६३॥ यद्वैवाभरणं पूजा वस्त्रालङ्कारभूषणं तत्सर्वं शिल्पिनेदेयं माचार्यायतु

याज्ञियं ॥६४॥ ततो महोत्सवं कुर्यान्नृत्यगीतैरनेकशः। नैवेद्यारात्रिकं पूजा मंगन्यासादिकं तथा।
॥६५॥ क्षीरं क्षौद्रं घृतं रक्तं पक्वान्नानि बहून्यपि। षड्रसस्वादुभक्ष्यानि समन्तात् परिकल्पयेत्॥
॥६६॥ विप्राणां संप्रदायात्र वेदमंत्रैस्तथागमैः। सकलीकरणं जीवन्यासं कृत्वा प्रतिष्ठयेत्॥६७॥ प्रासा
दे देवतान्यासं स्थावरेषु पृथक्पृथक्। खुरशिलायां वाराह नागकुलानि च॥६८॥६९॥ प्रकुम्भे
जलदेवांश्च पुष्पकेषु सुरांस्तथा। नन्दिनं जाड्यकुम्भेच कण्ठाल्यां स्थापयेद्धरिं॥६७॥ गरोशं
गजपीठेच अश्वपीठे तथाश्विनौ। नरपीठे नरं चैव हंसांश्च खुरके जयेत्॥७०॥ भद्रे सन्ध्यात्रयं
कुम्भे पार्वती कलशे स्थिता। कपोताल्यान्तु गन्धर्वान् मंचिकायां सरस्वतीं॥७१॥ जंघायांच

दिशापाला निन्द्रमुद्गमसंस्थितं। सावित्रीं भरणीदेशे शिरावल्यांच दैविकां॥७२॥ विद्याधरान्
कपोताल्यां मन्तराल्यां सुरांस्तथा। पर्जन्यं कुम्भच्छाद्येच ततो मध्ये प्रतिष्ठयेत्॥७३॥ शाखयोश्चन्द्र
सूर्यौ च त्रिमूर्त्तिं चोत्तरंगके। उदुम्बरे स्थितं यक्षं मश्विनावर्धचन्द्रके॥७४॥ कोणिकायां धराधारं
क्षितिं चोत्तारपट्टके। स्तम्भेषु पर्वतांश्चैव माकाशंच करोटके॥७५॥ मध्ये प्रतिष्ठयेद्देवं मकरे
जाह्नवीं तथा। शिखरे चोरुशृंगेषु पंच पंच प्रतिष्ठयेत्॥७६॥ ब्रह्मा विष्णुस्तथा रुद्र ईश्वरस्य
सदाशिवं। शिखरे वैश्वरं देवं शिखायां तं सुराधिपं॥७७॥ ग्रीवायाममरं देवमण्डुकेच निशा
करं। पद्माहं पद्मपत्रेच कलशेच सदाशिवं॥७८॥ सद्योवामस्तथा घोरस्तत्पुरुष इशस्तथा।

कर्णादि गर्भपर्यन्तं पंचांगे तान् प्रतिष्ठयेत्॥७५॥ इति स्थावर प्रतिष्ठा॥ प्रथमं देवतादृष्टे दर्शयेत् धान्यपर्वतं। विप्रं कुमारिकां वस्तु ततोलोकान् प्रदर्शयेत्॥८०॥ इत्येवं च ततः कुर्यात् सूत्रधारस्य पूजनं। वस्त्रालंकारैर्भूरि भोगै र्महिष्यश्वैश्च वाहनैः॥८१॥ अन्येषां शिल्पिनां पूजा कर्त्तव्या कर्मकारिणां। स्वाधिकारानुसारेण वस्त्रताम्बूलभोजनैः॥८२॥ काष्ठपाषाण निर्माण कारिणो यत्र मन्दिरे। भुंजते तत्र भुंक्तेऽसौ शंकरस्त्रिदशैः सह॥८३॥ पुण्यं प्रासादजं स्वामी प्रार्थयेत सूत्रधारतः। सूत्रधारोवदेत् स्वामिन्नुत्तुंगं भवतात्तव॥८४॥ इति सूत्रधार पूजा॥ आचार्य पूजनं कृत्वा वस्त्रस्वर्ण धनैः सह। दानं दद्यात् द्विजातिभ्यो दीनान्धदुर्बलेषुच॥८५॥ सर्वेषां धनमाधारः प्राणिनां जीवनं परं। वित्ते दत्ते प्रतुष्यंति मानुषाः पितरः सुराः॥८६॥ इति प्रतिष्ठा

विधिः॥ सुप्रतिष्ठा वीतरागस्य जिनशासनमार्गतः। नवाकार सूरिमंत्रैः सिद्धकेवलभावितैः॥८७॥ अर्हः सर्वज्ञदेवस्य पादपीठे प्रतिष्ठिताः। येनानन्तविभेदेन मुक्तिमार्ग उदाहृतः॥८८॥ जिनानां मातरो यक्षी यक्षिणी गौतमादयः। सिद्धाः कालत्रये जाता श्चतुर्विंशति मूर्तयः॥८९॥ इतिस्थाप्या जिनावासे त्रिप्रकारं गृहं तथा। सामन्ताशिखरं नन्दि संस्थाष्टापदादिकं॥९०॥ प्रासादो वीतरागस्य पुरमध्ये सुखावहः। नृणां कल्याणकारी स्यात् चतुर्दिक्षु प्रकल्पयेत्॥९१॥ इति जिन प्रतिष्ठा॥ माघादि पंचमासेषु वापी कूपादि संस्कृतिः। तडागस्य चतुर्मास्यै र्कुर्या दाषाढमार्गयोः॥९२॥ असंस्कृतं जलं देवाः पितरो न पिबंतितत्। संस्कृते तृप्तिमायान्ति तस्मात् संस्कारमाचरेत्॥९३॥ जीवनं वृक्षजन्तूनां यः करोति जलाशयं। दत्ते वा स लभेन्मोहं उर्वीं स्वर्गे

च मानवः॥९४॥ पुरान्धकवधे रुद्र ललाटात् पतितं क्षितौ। स्वेदस्तस्मात् समुद्भूतं भूत
मत्यन्त दुस्सहं॥९५॥ गृहीत्वा सहसा देवैः न्यस्तं भूम्यां वधोमुखं। जानुनी कोणयोः पा
दौ रक्षोदिशि शिवे शिरः॥९६॥ चत्वारिंशद्युताः पंच वास्तु देहे स्थिताः सुराः। देव्योऽष्टौ वाह्य
गास्तेषां वसना द्वास्तु रुच्यते॥९७॥ अधोमुखेन विनतैः स्विद्यद्भिर्विह्वलोवलिः। तेनैव
वलिना शान्तिं कुरुते नित्यमन्यथा॥९८॥ प्रासाद भुवनादीनां प्रारम्भे परिवर्त्तने। वास्तु
कर्म्मसु सर्वेषु पूजितः सौख्यदो भवेत्॥९९॥ एकमादि द्वद्वास्तु यावत् पद सहस्रकं।
द्वात्रिंशन्मण्डलानि स्युः क्षेत्र तुल्याकृतीनिच॥१००॥ एकाशीति पदो वास्तु श्चेतुः षष्टि पदोऽ

थवा। सर्व वास्तु विभागेषु पूजयेन्मण्डल द्वयं॥१०१॥ ईशे मूर्धनि पर्जन्यो दक्षिणं करमाश्रितः।
जयस्कन्धे महेन्द्राद्याः पंच दक्षिण बाहुगाः॥१०२॥ महेन्द्रादित्य सत्याश्च भृशं आकाशमेवच।
वह्निर्जानुनि पूषाद्याः सप्त पादे नलीस्थिताः॥१०३॥ पूषाच वितथश्चैव गृहक्षतो यम स्तथा।
गन्धर्वो भृंगराजश्च मृगः सप्तछद इति॥१०४॥ पादयोः पितृ स्तस्मात् सप्त पादलता स्थिताः।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः॥१०५॥ असुरः शोषो यक्ष्माच रोगो जानुनि
संस्थितः॥ नागो मुख्यश्च भल्लाटः सोमो गिरिश्च बाहुगाः॥१०६॥ अदितिः स्कन्धदेशे च वामे करेऽ
दितिः स्थिता। द्वात्रिंश द्वास्तु देवा नाभि पृष्ठ स्थितोविधिः॥१०७॥ अर्यमादक्षिणे वामे
स्तनेतु पृथिवीधरः। विवस्वानथ मित्रश्च दक्षवामोरुगावुभौ॥१०८॥ आपस्तु गलके वास्तोः

रापवत्सो हृदिस्थितः। सावित्रं सविता तद्वत् करं दक्षिण माश्रितौ।।२०७॥ इन्द्र इन्द्रजयौ मेढ्रे रुद्रोऽसौ वामहस्तके। रुद्रदासोऽपि तत्रैव इति देवमयं वपुः॥२१०॥ ईशानेचरकी वाह्ये पिलिपिच्छाच पूर्वतः। विदारिकाग्निकोणेच जंघा याम्य दिगाश्रिता॥२११॥ नैर्ऋते पूतना स्कन्दा पश्चिमेवायुकोणके। पापराक्षसिका सौम्ये भल्लाख्ये एवं समर्चयेत्॥२१२॥ देवीं सुरान् यमादींश्च भक्ष्यान्नैः सुरसामिषैः। अपरान् घृतपक्वान्नैः सर्वान् स्वर्णैः सुगन्धिभिः॥२१३॥ इतिवास्तुपुरुष विन्यासः॥ एकेन शास्त्रेण सुशास्त्रिकेन विना द्वितीयेन पदार्थसिद्धिः। तस्मात प्रकारान्तरतो विलोक्य मणेर्गुणस्यापि सहायकाक्षी॥२१४॥ श्रीविश्वकर्मगणानाथ मेरुशचरणौ श्रीविश्वरूप जगदीश्वर सुप्रसादात्। प्रासादमण्डनमिदं रुचिरं चकार श्रीमण्डनो गुणवतां भुविसूत्रधारः॥२१५॥ इतिसूत्रधार मण्डनविरचित वास्तुशास्त्रे प्रासाद मण्डनेऽष्टमोऽध्यायः॥०॥ श्री॥ ॥ श्रीरस्तु॥ शुभं भवतु॥ श्री॥ श्री॥ श्री॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017